नदीतटम् । पण्डितः । इति केचित् ॥ बालकस्य ग्रहविशेषः । (यथा,—

"स्कन्दो विशाखो मेषाख्यः श्वग्रहः पितृसंज्ञितः ।
शकुनिः पूतना शीतपूतना दृष्टिपूतना ॥
मुखमण्डलिका तद्वद्रेवती शुष्करेवती ।
तेषां ग्रहीष्यतां रूपं प्रततं रोदनं ज्वरः ॥
सामान्यं रूपमुत्त्रासजृम्भाभ्रूक्षेपदीनताः ।
फेनस्रावोर्द्ध्वदृष्ट्योष्ठदन्तदंशप्रजागराः ॥
रोदनं कूजनं स्तन्यविद्वेषस्वरवैकृतम् ।
नखैरकस्मात् परितः स्वधात्र्यङ्गविलेखनम् ॥
तत्रैकनयनस्रावी शिरो विक्षिपते मुहुः ।
हतैकपक्षः स्तब्धाङ्गः सस्वेदो नतकन्धरः ॥
दन्तखादी स्तनद्वेषी त्रस्यन् रोदिति विस्वरः ।
वक्रवक्त्रो वमँल्लालां भृशमूर्द्ध्वं निरीक्षते ॥
वसासृग्गन्धिरुद्विग्नो बद्धमुष्टिशकृच्छिशुः ।
चलितैकाक्षिगण्डभ्रूः संरक्तो भयलोचनः ॥
स्कन्दार्त्तस्तेन वैकल्यं मरणं वा भवेद्ध्रुवम् ॥"

इत्युत्तरस्थाने तृतीयेऽध्याये वाभटेनोक्तम् ॥) तस्य चिकित्सा बालग्रहशब्दे द्रष्टव्या ॥

स्कन्दनं, क्ली, (स्कन्द + ल्युट् ।) रेचनम् । इति त्रिकाण्डशेषः ॥ (यथा, सुश्रुते । १ । १४ ।

"चतुर्व्विधं यदेतद्धि रुधिरस्य निवारणम् ।
सन्धानं स्कन्दनञ्चैव पाचनं दहनन्तथा ॥")

गमनम् । शोषणम् । इति स्कन्दधात्वर्थदर्शनात् ॥

स्कन्दषष्ठी, स्त्री, (स्कन्दप्रिया षष्ठी ।) चैत्रमासीयशुक्लषष्ठी । तत्प्रमाणादि षष्ठीशब्दे द्रष्टव्यम् ॥ अन्यच्च ।

"अमावस्यासमुत्पन्नः स्कन्दः पूर्व्वं हुताशनात् ।
ततः षष्ठ्यान्तु शुक्लायां मासि तु चैत्रनामनि ।
सेनापत्येऽभिषिक्तस्तु देवानां ब्रह्मणा स्वयम् ॥

इति संवत्सरकौमुदीधृतब्रह्मपुराणवचनम् ॥

स्कन्दांशकः, पुं, (स्कन्दस्य अंश इव अंशो यत्र । शिववीर्य्योद्भवत्वात् । ततः कन् ।) पारदः । इति राजनिर्घण्टः ॥

स्कन्धः, [स्] क्ली, (स्कन्दते इति । स्कन्द + "स्कन्देश्च स्वाङ्गे ।" उणा० ४ । २०६ । इति असुन् धयान्तादेशः ।) अंसः । प्रकाण्डः । यथा, "स्कन्धः सान्तं नपुंसकमिति केचित् ।" इत्यमरटीकायां भरतः ॥ (यथा, ऋग्वेदे । १।३२।५ ।

"स्कन्धांसीव कुलिशेनाविवृक्णा ॥",)

स्कन्धः, पुं, (स्कन्द्यतेऽसौ इति । स्कन्द + घञ् । पृषोदरादित्वात् साधुः । स्कन्द + असुन् । धयान्तादेशः । सर्व्वे सान्ता अदन्ताश्च इति न्यायात् अकारान्तो वा ।) अवयवविशेषः । काँध इति भाषा ॥ तत्पर्य्यायः । भुजशिरः २ अंसः ३ । इत्यमरः । २ । ६ । ७८ ॥ स्कन्धः ४ । इति शब्दरत्नावली ॥ दोःशिखरम् ५ । इति राजनिर्घण्टः ॥ (यथा, भागवते । ४ । २९ । ३३ ।

"यथा हि पुरुषो भारं शिरसा गुरुमुद्वहन् ।
तं स्कन्धेन स आधत्ते तथा सर्व्वाः प्रतिक्रियाः ॥")

तरोर्म्मूलादिशाखापर्य्यन्तम् । गुँड़ी इतिभाषा । तत्पर्य्यायः । प्रकाण्डः २ । इत्यमरः ॥ काण्डम् ३ इति शब्दरत्नावली ॥ दण्डः ४ । इति जटाधरः ॥ (यथा, रघुः । ४ । ५७ ।

"खर्ज्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुन्नागेभ्यः शिलीमुखाः ॥")

नृपतिः । सम्परायः । समूहः । कायः । (यथा, महाभारते । १२ । १५ । २६ ।

"सूक्ष्मयोनीनि भूतानि तर्कगम्यानि कानिचित् ।
पक्ष्मणोऽपि निपातेन येषां स्यात् स्कन्धपर्य्ययः ॥")

भद्रादिः । छन्दोभेदः । इति मेदिनी ॥ विज्ञानादिपञ्च । (यथा, शिशुपालवधे । २ । २८ ।

"सर्व्वकार्य्यशरीरेषु मुक्त्वाङ्गस्कन्धपञ्चकम् ।
सौगतानामिवात्मान्यो नास्ति मन्त्रो महीभृताम् ॥"

"रूपवेदनाविज्ञानसंज्ञासंस्काराः पञ्च स्कन्धाः तत्र विषयप्रपञ्चो रूपस्कन्धः । तज्ज्ञानप्रपञ्चो वेदनास्कन्धः । आलयविज्ञानसन्तानो विज्ञानस्कन्धः । नामप्रपञ्चः संज्ञास्कन्धः । वासनाप्रपञ्चः संस्कारस्कन्धः । एवं पञ्चधा परिवर्त्तमानो ज्ञानसन्तान एवात्मा इति बौद्धाः ।" इति तट्टीकायां मल्लिनाथः ॥) व्यूहः । इति हेमचन्द्रः ॥ (यथा, रघुः । ४ । ३० ।

"प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुस्स्कन्धेव सा चमूः ॥")

पन्थाः । इति शब्दरत्नावली ॥ (यथा महाभारते । ३ । २३० । ५५ ।

"तथाब्रवीत् महासेनं महादेवो बृहद्वचः ।
सप्तमं मारुतस्कन्धं रक्ष नित्यमतन्द्रितः ॥")

ग्रन्थपरिच्छेदः । यथा,—

श्रीपार्व्वत्युवाच ।
स्कन्धैर्द्वादशभिः प्रोक्तं श्रीमद्भागवतं प्रभो ।
शुकस्तत्कथयामास महाराजं परीक्षितम् ॥"

इति पाद्मे पातालखण्डे ७१ अध्यायः ॥

स्कन्धचापः, पुं, (स्कन्धे चाप इव ।) वंशादिनिर्म्मितशिक्याधानम् । तत्पर्य्यायः । विहङ्गिका २ । इति हारावली ॥

स्कन्धजः, पुं, (स्कन्धात् जायते इति । जन + ड ।) शल्लक्यादिः । यथा, हेमचन्द्रे ।

"पर्व्वयोनय इक्ष्वाद्याः स्कन्धजाः शल्लकीमुखाः ॥"

मुद्राङ्कितहेमचन्द्रे कन्दज इति पाठः ॥ (वटः । अस्य पर्य्यायो यथा,—

"वटो रक्तफलः शृङ्गी न्यग्रोधः स्कन्धजो ध्रुवः ।
क्षीरी वैश्रवणावासो बहुपादो वनस्पतिः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

स्कन्धतरुः, पुं, (स्कन्धप्रधानस्तरुः ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥

स्कन्धदेशः, पुं, (स्कन्धस्य देशः ।) गजस्य स्कन्धः । यत्र हस्तिपक उपविशति । तत्पर्य्यायः । आसनम् २ । इत्यमरः ॥ स्कन्धमात्रम् । यथा,—

"त्रिपुरारिः स्कन्धदेशे कण्ठे कामाङ्गनाशनः ॥"

इति भृगुभरतसंवादे माहेश्वरकवचम् ॥

स्कन्धफलः, पुं, (स्कन्धे फलमस्य ।) नारिकेलवृक्षः । इति राजनिर्घण्टः ॥ उडुम्बरवृक्षः । इति शब्दचन्द्रिका ॥

स्कन्धवन्दना, स्त्री, (स्कन्धे वन्दनमिवास्याः ।) मधुरिका । इति शब्दचन्द्रिका ॥

स्कन्धमल्लकः, पुं, (स्कन्धेन मल्ल इव । कन् ।) कङ्कपक्षी । इति हेमचन्द्रः ॥

स्कन्धरुहः, पुं, (स्कन्धात् रोहतीति । रुह + कः ।) वटवृक्षः । इति राजनिर्घण्टः ॥

स्कन्धवाहः, पुं, (स्कन्धेन वाहयतीति । वह + णिच् + अच् ।) शकटादिवाहकवृषः । यथा,

"स्कन्धवाहस्तु शङ्कुश्च शृङ्गी गौरचधूर्त्तिलः ॥"

इति हारावली ॥

स्कन्धवाहकः, पुं, (स्कन्धेन वहतीति । वह + ण्वुल् ।) शकटादिवाहकवृषः । तत्पर्य्यायः । स्कन्धिकः २ । इति हेमचन्द्रः ॥ स्कन्धेन वहनकर्त्तरि, त्रि ॥

स्कन्धशाखा, स्त्री, (स्कन्धस्य शाखा ।) वृक्षस्य मुख्यशाखा । तत्पर्य्यायः । शाला २ । इत्यमरः । २ । ४ । ११ ॥ (यथा, भागवते । ८।५।४९ ।

"यथा हि स्कन्धशाखानां तरोर्म्मूलावसेचनम् ।
एवमाराधनं विष्णोः सर्व्वेषामात्मनश्च हि ॥")

स्कन्धशृङ्गः, पुं, (स्कन्धपर्य्यन्तं शृङ्गमस्य ।) महिषः । इति केचित् ॥

स्कन्धा, स्त्री, शाखा । लता । इति केचित् ॥

स्कन्धाग्निः, पुं, (स्कन्धस्य काण्डस्य अग्निरिव ।) स्थूलकाष्ठाग्निः । इति त्रिकाण्डशेषः ॥

स्कन्धानलः, पुं, (स्कन्धस्य काण्डस्य अनल इव ।) स्थूलकाष्ठाग्निः । तत्पर्य्यायः । स्थूलकाष्ठधक् २ । इति जटाधरः ॥

स्कन्धावारः, पुं, (स्कन्धेन सैन्यसमूहेन व्यूहेन नृपतिना वा आव्रियते इति । आ + वृ + घञ् ।) सैन्यस्थितिः । (यथा, रामायणे । ६।४२।२२ ।

"एतस्मिन्नन्तरे चक्रुः स्कन्धावारनिवेशनम् ॥")

राजधानी । इति हेमचन्द्रः ॥ (यथा, महाभारते । १ । १८५ । ६ ।

"ते तु दृष्ट्वा परं तत्र स्कन्धावारञ्च पाण्डवाः ।
कुम्भकारस्य शालायां निवासं चक्रिरे तदा ॥")

कटकः । इति भूरिप्रयोगः ॥

स्कन्धिकः, पुं, (स्कन्धेन वहतीति । स्कन्ध + ठक् ।) स्कन्धवाहकवृषः । इति हेमचन्द्रः ॥

स्कन्धी, [न्] पुं, (स्कन्धोऽस्यास्तीति । इनिः ।) वृक्षः । इति रत्नमाला ॥ स्कन्धयुक्ते, त्रि ॥ (काण्डविशिष्टे, च त्रि । यथा, महाभारते । १२ । १५४ । ५ ।

"हिमवन्तं समासाद्य महानासीद्वनस्पतिः ।
वर्षपूगाभिसंवृद्धः शाखी स्कन्धी पलाशवान् ॥")

स्कन्नं, त्रि, (स्कन्द + क्तः ।) च्युतम् । इत्यमरः । ३ । १।१०४ ॥ (यथा, महाभारते ।१।६३।४८ ।

"स्कन्नमात्रञ्च तद्रेतो वृक्षपत्रेण भूमिपः ।
प्रतिजग्राह मिथ्या मे न पतेद्रेत इत्युत ॥")

शुष्कम् । गतम् । इति स्कन्दधात्वर्थदर्शनात् ॥